# श्री कालहस्तीश्वर स्तोत्रं

**श्री कालहस्तीश्वर स्तोत्रं**

महेश्वरं महोन्नतं महेश्वरं सदानम-
द्गणेश्वरं गुणान्वितं गणेश्वरं जगन्नुतं |
अनीश्वरं वृषाश्वरंहसाश्वरुद्रगामिनं
सदा भजामि कालहस्तिसांबमूर्तिमीश्वरं ||

निटालविस्फुटैकदृक्तटालवह्निचिच्छटा
लसद्ध्वनिप्रकृज्जटालनिष्ठहैमनं |
घटीभवादिमौनिहृत्कुटीभवत्पदं त्रिगुं(विभुं)
सदा भजामि कालहस्तिसांबमूर्तिमीश्वरं ||

घनाघनादियज्ञभुग्घनाघनप्रचारकृद्-
द्युनाघनामहस्सुहृद्दृढासुहृद्धनुस्स्वनं |
घनाघनव्यपेटिकाघनाघनप्रभंजनं
सदा भजामि कालहस्तिसांबमूर्तिमीश्वरं ||

जटाकुटीरधन्यधुन्यभंगभंगसंघटा-
घुमंघुमंघुमंघुमद्ध्वनिध्वनद्दरीस्फुटं |
कटीतटीघटीकृतोत्कटाजिनं ककुप्पटं
सदा भजामि कालहस्तिसांबमूर्तिमीश्वरं ||

सुधाशनाधिराट्पुरीसुगह्वरीजमंजरी-
स्फुरन्मरंदनिर्झरीधुराधुराधुरीणगीर्गणं |
विराट्तुरंगमार्गणं विशेषविष्णुमार्गणं
सदा भजामि कालहस्तिसांबमूर्तिमीश्वरं ||

|| **इति श्रीकालहस्तीश्वरस्तोत्रं संपूर्णं** ||